क्रं. १३

संस्कृत.

प्रश्नोपनिषद.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशायनमः ॥ ॐ भद्रंकर्णेभिः ० बृहस्पतिर्दधातु । ० ॐ शांतिः ३ ॥ सुके
शाच भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणीच गार्ग्यः कौसल्यश्चाश्वलायनो भा
र्गवो वैदर्भिः कबंधी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परंब्रह्मान्वेषमाणा एष
ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवंतं पिप्पलादमुपसन्नास्तान्ह स ऋषि
रुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान्पृच्छ
त यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इत्यथ कबंधी कात्यायन उपेत्य पप्रच्छ भगव
न्कुतो ह वा इमाः प्रजाः प्रजायंत इति तस्मै स होवाच प्रजाकामो वै प्रजापतिः स त
पोतप्यत स तपस्तप्त्वा स मिथुनमुत्पादयते रयिं च प्राणं चेत्येतौ मे बहुधा प्रजाः करि

(2)

प्रश्न॰ ष्यतइत्यादि॥ योहवै प्राणोरयिरेवचंद्रमारयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तंच तस्मा-
१ न्मूर्तिरेवरयिरथादित्यउदयन्यप्राचीं दिशंप्रविशतितेनप्राच्यान्प्राणान्रश्मिषुस
न्निधत्ते यद्दक्षिणांयत्प्रतीचींयदुदीचींयदधोयदूर्ध्वंयदंतरादिशोयत्सर्वंप्र-
काशयतितेनसर्वान्प्राणान्रश्मिषुसन्निधत्ते॥सएषवैश्वानरोविश्वरूपःप्राणो
ग्निरुदयतेतदेतदृचाभ्युक्तं॥विश्वरूपंहरिणंजातवेदसंपरायणंज्योतिरेकंत
पंतं।सहस्ररश्मिःशतधावर्तमानःप्राणःप्रजानामुदयत्येषसूर्यः।संवत्सरो
वैप्रजापतिस्तस्यायनेदक्षिणंचोत्तरंच॥तद्येहवैतदिष्टापूर्तेकृतमित्युपासतेते
चांद्रमसमेवलोकमभिजयंतेतएवपुनरावर्ततेतस्मादेतऋषयःप्रजाकामा १

(2A)

दक्षिणप्रतिपद्यंतएषहवैरयिर्यःपितृयाणोथोत्तरेणतपसाब्रह्मचर्येणश्रद्धया
विद्ययात्मानमन्विष्यादित्यमभिजयंतएतद्वैप्राणानामायतनमेतदमृतमभ
यमेतत्परायणमेतस्मान्नपुनरावर्तंतइत्येषनिरोधस्तदेषश्लोकःपंचपादंपित
रंद्वादशाकृतिंदिवआहुःपरेअर्धेपुरीषिणं।अथेमेअन्यउपरेविचक्षणंसप्तच
क्रेषडरआहुरर्पितमिति।मासोवैप्रजापतिस्तस्यकृष्णपक्षएवरयिःशुक्लः-
प्राणस्तस्मादेतऋषयःशुक्लइष्टंकुर्वंतीतरइतरस्मिन्नहोरात्रोवैप्रजापतिः
स्तस्याहरेवप्राणोरात्रिरेवरयिःप्राणंवाएतेप्रस्कंदंतियेदिवारत्यासंयुज्यंतेब्रह्म
चर्यमेवतद्यद्रात्रौरत्यासंयुज्यंतेअन्नंवैप्रजापतिस्ततोहवैतद्रेतस्तस्मादिमाःप्रजाः

(3)

प्रश्न॰ प्रजायंतइतितेनयेहवैतत्प्रजापतिव्रतंचरंतितेमिथुनमुत्पादयंतेतेषामेवैषब्र

२ ह्मलोकोयेषांतपोब्रह्मचर्यंयेषुसत्यंप्रतिष्ठितंतेषामसौविरजोब्रह्मलोकोनये

षुजिह्ममनृतंनमायाचेति ॥ १ ॥ अथहैनंभार्गवोवैदर्भिःपप्रछभगवन्कत्ये

वदेवाःप्रजांविधारयंतेकतरएतत्प्रकाशयंतेकःपुनरेषांवरिष्ठइतितस्मैसहो

वाचाकाशोहवाएषदेवोवायुरग्निरापःपृथिवीवाङ्मनश्चक्षुःश्रोत्रंचतेप्रकाश्या

भिवदंतिवयमेतद्बाणमवष्टभ्यविधारयामस्तान्वरिष्ठःप्राणउवाचमामो

हमापद्यथाहमेवैतत्पंचधात्मानंप्रविभज्यैतद्बाणमवष्टभ्यविधारयामी

तितेश्रद्दधानाबभूवुःसोभिमानादूर्ध्वमुत्क्रामतइवतस्मिन्नुत्क्रामत्यथे २

(3A)

थेतरे सर्व एवोत्क्रामंते तस्मिंश्च प्रतिष्ठमाने सर्व एव प्रातिष्ठंते तद्यथाम
क्षिका मधुकरराजानमुत्क्रामंतं सर्वा एवोत्क्रामंते तस्मिंश्च प्रतिष्ठमाने
सर्वा एव प्रातिष्ठंत एवं वाङ्मनश्चक्षुः श्रोत्रं च ते प्रीताः प्राणं स्तुन्वंत्येषोग्निस्त
पत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्देवः सदसच्चामृतं च
यत् ॥ अराइव रथनाभौ प्राणे सर्वं प्रतिष्ठितं । ऋचो यजूंषि सामानि यज्ञः
क्षत्रं ब्रह्म च । प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे । तुभ्यं प्राण प्रजास्त्वि
मा बलिं हरंति यः प्राणैः प्रतितिष्ठसि । देवानामसि वह्नितमः पितॄणां प्रथ
मा स्वधा । ऋषीणां चरितं सत्यमथर्वांगिरसामसि । इंद्रस्त्वं प्राण तेजसा रु

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai
"Joint project of the ..."

(५)

प्रश्न॰ द्रोसिपरिरक्षितात्वमंतरिक्षेचरसिसूर्यस्त्वंज्योतिषांपतिः।यदात्वमभिवर्षस्यथे

३ माःप्राणतेप्रजाः।आनंदरूपास्तिष्ठंतिकामायान्नंभविष्यतीति।व्रात्यस्त्वंप्राणै=

णेकऋषिरत्ताविश्वस्यसत्पतिः।वयमाद्यस्यदातारःपितात्वंमातरिश्वनःयाते

तनूर्वाचिप्रतिष्ठितायाश्रोत्रेयाचचक्षुषि।याचमनसिसंतताशिवांतांकुरुमोत्क्र

मीः।प्राणस्येदंवशेसर्वंत्रिदिवेयत्प्रतिष्ठितं।मातेवपुत्रान्रक्षस्वश्रीश्चप्रज्ञांच

विधेहिनइति॥२॥अथहैनंकौसल्यश्चाश्वलायनःपप्रच्छभगवन्कुतएषप्रा

णोजायतेकथमायात्यस्मिञ्छरीरआत्मानंवाप्रविभज्यकथंप्रातिष्ठतेकेनोत्क्रमते

कथंबाह्यमभिधत्तेकथमध्यात्ममितितस्मैसहोवाचातिप्रश्नान्पृच्छसिब्रह्मिष्ठोसी ३

(५A)

तितस्मात्तेहं ब्रवीम्यात्मन एष प्राणो जायते यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनो
कृतेनायात्यस्मिं छरीरे यथा सम्राडेवाधिकृतान्विनियुंक्त एतान्ग्रामानेतान्ग्रामान-
धितिष्ठस्वेत्येवमेवैष प्राण इतरान्प्राणान्पृथक्पृथगेव सन्निधत्ते पायूपस्थेपानं चक्षुः श्रो
त्रे मुखनासिकाभ्यां प्राणः स्वयं प्रातिष्ठते मध्ये तु समान एष ह्येतद्धुतमन्नं समं नयति त-
स्मादेताः सप्तार्चिषो भवंति हृदि ह्येष आत्मात्र तदेकशतं नाडीनां तासां शतं शतमेकैक
स्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवंत्यासु व्यानश्चरत्यथैकयोर्ध्व उ
दानः पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकमादित्यो ह वै बाह्यः
प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः पृथिव्यां या देवता सैषा पुरुषस्यापान-

(5)

प्रश्न०

४

मनःष्टथ्यांतरायदाकाशः ससमानोवायु र्व्यानः यद्वाय्वं स्तेजोहवावउदान स्तस्मादुपशां

तनेजाः पुनर्भवमिंद्रियैर्मनसिसंपद्यमानैर्यच्चित्त स्तेनैष प्राणमायाति प्राणस्तेजासा

युक्तःसहात्मनायथासंकल्पितं लोकं नयति य एवं विद्वान्प्राणंवेद नहास्य प्राजाहीय प्रा

तेमृतोभवतितदेषश्लोकः ॥ उत्पत्तिमायतिं स्थानं विभुं चैवपंचधा ॥ अध्याले त्वं

चैव प्राणस्य विज्ञायामृतमश्नुते विज्ञायामृतमश्नुतइति ॥ ३ ॥ अथहैनं सौर्यायणी

नू गार्ग्यः पप्रछ भगवन्नेतस्मिंपुरुषेकानिस्वपंति कान्यस्मिञ्जाग्रतिकतर एषदेवः

स्वप्नान्पश्यतिकस्यैतत्सुखंभवतिकस्मिन्नुसर्वेसंप्रतिष्ठित्ता भवंतीतितस्मैसहोवा

चयथागार्ग्यमरीचयो र्कस्यास्तंगछतः सर्वाएतस्मिंस्तेजोमंडलएकीभवंतिताः ४

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

पुनःपुनरुदयतः अवरंस्येवंह्वैवेतत्सर्वंपरेदेवेमनस्येकीभवतितेनतर्ह्येष
पुरुषोनशृणोतिनपश्यतिनजिघ्रतिनरसयतेनस्पृशतेनाभिवदतेनादत्ते
नानंदयतेनविसृजतेनेयायतेस्वपितीत्याचक्षतेप्राणाग्नयएवैतस्मिन्पुरे
जाग्रतिगार्हपत्योहवाएषोपानोव्यानोन्वाहार्यपचनोयद्गार्हपत्यात्प्रणीयतेप्र
णयनादाहवनीयःप्राणोयदुछ्वासनिश्वासावेतावाहुतीसमंनयतीतिस
समानोमनोहवावयजमानइष्टफलमेवोदानःसएनंयजमानमहरहर्ब्र
ह्मगमयत्यत्रैषदेवःस्वप्नेमहिमानमनुभवतियदृष्टंदृष्टमनुपश्यतिश्रुतं
श्रुतमेवार्थमनुशृणोतिदेशदिगंतरैश्चप्रत्यनुभूतंपुनःपुनःप्रत्यनुभवति

Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

श्रुतंचा तं

प्रश्न० दृष्टंचादृष्टंच श्रुतंचानुभूतंचाननुभूतंच सच्चासच्च सर्वंपश्यति सर्वः पश्यति सय
५ दातेजसाभिभूतोभवत्यत्रैषदेवः स्वप्नान्नपश्यत्यथतदैतस्मिंछरीरएतत्सुखं
भवति सयथासोम्यवयांसिवासोवृक्षं संप्रतिष्ठंत एवंहवैतत्सर्वंपरआत्मनिसं
प्रतिष्ठते पृथिवीचपृथिवीमात्राचापश्चापोमात्राचतेजश्चतेजोमात्राचवायुश्च
वायुमात्राचाकाशश्चाकाशमात्राचचक्षुश्चद्रष्टव्यंचश्रोत्रंचश्रोतव्यंचघ्राणंच
घ्रातव्यंचरसश्चरसयितव्यंचत्वक्चस्पर्शयितव्यंचवाक्चवक्तव्यंचहस्तौचादातव्यंचो
पस्थश्चानंदयितव्यंचपायुश्चविसर्जयितव्यंचपादौचगंतव्यंचमनश्चमंतव्यंचबु
द्धिश्चबोद्धव्यंचाहंकारश्चाहंकर्तव्यंचचित्तंचचेतयितव्यंचतेजश्चद्योतयितव्यंच वि ५

(6A)

प्राणश्च विधारयितव्यं चैष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मंता बोद्धा कर्ता विज्ञाना
त्मा पुरुषः स परे अक्षरे आत्मनि संप्रतिष्ठते परमेवाक्षरं प्रतिपद्यते स यो ह वै तदछायम
शरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वो भवति तदेष श्लोकः। वि-
ज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि संप्रतिष्ठंति यत्र तदक्षरं वेदयते यस्तु सोम्य स स
र्वज्ञः सर्वमेवाविवेशेति ॥ ४ ॥ अथ हैनं शैब्यः सत्यकामः पप्रच्छ स यो ह वै तद्भगव
न्मनुष्येषु प्रायणांतमोंकारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति तस्मै स हो
वाचैतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वे
ति स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसंपद्यते तमृचो

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7)

प्र॰भ॰ मनुष्यलोकमुपनयंतेसतत्रतपसाब्रह्मचर्येणश्रद्धयासंपन्नोमहिमानमनुभवत्यथ
६ यदिद्विमात्रेणमनसिसंपद्यतेसोंतरिक्षंयजुर्भिरुन्नीयतेसोमलोकंससोमलोकेविभू
तिमनुभूयपुनरावर्ततेयःपुनरेतंत्रिमात्रेणोमित्येतेनैवाक्षरेणपरंपुरुषमभिध्यायीतस
तेजसिसूर्येसंपन्नोयथापादोदरस्त्वचाविनिर्मुच्यतएवंहवैसपाप्मनाविनिर्मुक्तःससाम
भिरुन्नीयतेब्रह्मलोकंसएतस्माज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षतेतदेतौश्लो
कौभवतः ॥ तिस्रोमात्रामृत्युमत्यःप्रयुक्ताअन्योन्यसक्ताअनविप्रयुक्ताःक्रियासु
बाह्याभ्यंतरमध्यमासुसम्यक्प्रयुक्तासुनकंपतेज्ञः ॥ ऋग्भिरेतंयजुर्भिरंतरि
क्षंसामभिर्यत्तत्कवयोवेदयंते ॥ तमोंकारेणैवायतनेनान्वेतिविद्वान्यत्तच्छांतमज ६

(7A)

रममृतमभयंपरंचेति ॥ इतिपंचमप्रश्नः ॥ अथहैनंसुकेशाभारद्वाजःपप्रछभगव
न्हिरण्यनाभःकौशल्योराजपुत्रोमामुपेत्यैतंप्रश्नमपृछतषोडशकलंभारद्वाजपुरुषंवेत्थ
तमहंकुमारमब्रुवन्नाहमिमंवेदयद्यहमिममवेदिषंकथंतेनावक्ष्यमितिसमूलोवाएषपरि
शुष्यतियोनृतमभिवदतितस्मान्नार्हाम्यनृतंवक्तुंसतूष्णींरथमारुह्यप्रवव्राजतंत्वापृ-
छामिक्वासौपुरुषइतितस्मैसहोवाचेहैवांतःशरीरेसोम्यसपुरुषोयस्मिन्नेताःषोडशक
लाःप्रभवंतीतिसईक्षांचक्रेकस्मिन्नहमुत्क्रांतउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठि
तेप्रतिष्ठास्यामीतिसप्राणमसृजतप्राणाछ्रद्धांखंवायुर्ज्योतिरापःपृथिवींद्रियंमनो
न्नमन्नाद्वीर्यंतपोमंत्राःकर्मलोकालोकेषुचनामचसयथेमानद्यःस्यंदमानाःस

(४)

प्रश्न० मुद्रायणाः समुद्रं प्राप्यास्तं गच्छंति भिद्येते तासां नामरूपे । समुद्र इत्येवं प्रोच्यत ए

७ वमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छंति भिद्येते चा

सां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति तदेष श्लोकः ॥ अरा इव रथ

नाभौ कला यस्मिन्प्रतिष्ठिताः तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति तान्होवा

चैतावदेवाहमेतत्परं ब्रह्म वेद नातः परमस्तीति ते तमर्चयंतस्त्वं हि नः पिता योऽस्माक

तार मविद्यायाः परं पारं तारयसीति नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ ॐ भद्रं कर्णे

भिः ॥ ऋ० ॥ स्वस्ति नः ॥ ऋ० ॥ शांतिः शांतिः शांतिः ॥ इति प्रश्नोपनिषद समा

प्तः ॥ शके १८१० सर्वधारिनाम संवत्सरे माघ शुद्ध ९ मंदवार ॥ ६ ६ ६ ७

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com